
## अन्ताराष्ट्रिययोगदिवसं पुरस्कृत्य

# ग्रीष्मकालिकयोगचिकित्साशिबिरम्




विद्यापीठे विश्वविद्यालयानुदानायोगस्य निदेशानुसारेण पञ्चमः अन्ताराष्ट्रिययोगदिवसः **21.06.2019** तमे दिनाङ्के प्रातः **6.30** तः प्रारभ्य प्रातः **11.30** समयं यावत् विद्यापिठस्य योगविज्ञानविभाग-राष्ट्रियसेवायोजनापक्षतः पर्यपाल्यत । कार्यक्रमस्यारम्भः विद्यापीठवैभवमार्गे विद्यमानाय महर्षिपतञ्जलेः विग्रहाय माल्यार्पणेन समभूत् । सन्दर्भेऽस्मिन् समायोजितायां सभायां मान्याः कुलपतयः **आचार्य वि.मुरलीधरशर्म**महोदयाः आध्यक्ष्यं निर्वहन्तः सहस्रवर्षेभ्यः पूर्वं महर्षिपतञ्जलिना संस्कृत-भाषायां स्वास्थ्यरक्षार्थं यद्दिव्यौषधसदृशमुपायं समाजाय प्रदत्तं तस्य परिपालनेन पूर्णाङ्गमानवस्य विकासेन सह राष्ट्रस्यापि विकासः सम्भविष्यतीति प्राबोधयन् । अन्तर्दौवारिकक्रीडाङ्गणे (Indoor Stadium) सर्वेऽपि विद्यापीठस्यान्तेवासिनः, अध्यापकाः, कर्मचारिणश्च योगासनाभ्यासमकुर्वन् । जनमानसे योगविद्याप्रसाराय तिरुपतिनगरे शोभायात्रायाः समनन्तरं समूहे यौगिकाहारवितरणमभूत् । छात्रेषु प्रबन्धलेखन-भाषण-योगासनादि-विषये विविधाः प्रतिस्पर्धाः समायोजिताः ।

दुष्करं विषमौषधीकर्तुम् (It is difficult to turn poison into medicine.)

आधुनिकवातावरणसमस्याबहुलसमाजे योगाभ्यासं विना न कोऽपि उत्तमस्वास्थ्यं प्राप्तुं प्रभवति इति धिया मान्यानां कुलपतीनां प्रचोदनायाम् विद्यापीठे **01.05.2019** दिनाङ्कात् प्रारभ्य षड् दिनानि यावत् विशिष्टतया सार्वजनिकं ग्रीष्मकालिक-योग्याभ्यासचिकित्साशिबिरं समायोजितमासीत् । तत्र तिरुपतिवास्तव्याः प्रायशः शताधिकाः जनाः अस्मिन् शिबिरे भागमगृह्णन् । अत्र प्रामुख्येन योगासनानि, प्राणायामः, ध्यानम्, संस्कृतश्लोकोच्चारणम्, भगवद्गीताभ्यासः इत्यादिभिः hyper-



tension, backache, diabetes इत्यादीनां दुःसाध्यरोगाणां निवारणाय उपायाः अभ्यस्ताः । एवम् अन्ताराष्ट्रिययोगदिवसस्य अधोलिखिताः कार्यक्रमाः निर्दिष्टा आसन् । यथा —

1. Special Puja to Maharshi Patanjali Stature
2. Yoga Prayer
3. Inaugural address by chief guest
4. Common Yoga Protocol
5. Distribution of yogic diet
6. Yoga Awareness Rally
7. Refreshments to Participants
8. Valedictory function and prize distribution.